योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः ०३५

पञ्चत्रिंशः सर्गः ३५

श्रीवसिष्ठ उवाच ।

ततो मुहूर्तेन हरो गौरीकमलिनीसरः ।

मद्धिकासोन्मुखः स्वैरं विकासं बहिराददे ।। १

दृक्चयो द्योतयामास मुखाकाशतलोदितः ।

बोधं समुद्गकादर्क अंशुराशिरिवोद्गतः ।। २

ईश्वर उवाच ।

मुने मननमाहूय स्वसत्तैवाशु मीयताम् ।

त्वमर्थं माहरानर्थं पवनः स्पन्दतामिव ।। ३

द्रष्टव्यमिह यत्किंचित्तद्दृष्टं किं समं भ्रमैः ।

न हि हेयमुपादेयं चेह पश्यामि तद्विदः ।। ४

शान्त्यशान्तिमयानेतान्विकल्पान्दलयन्नसिः ।

धीरोसिनान्यथाऽऽस्थित्वा त्वमेव भव चात्मदृक् ।। ५

इमां दृश्यदशामाशु बाह्यबोधाय वा पुनः ।

समाश्रित्य मदुक्तं त्वं श्रृणु तूष्णीं स्थितेन किम् ।। ६

इत्युक्त्वा बाह्यबोधस्त्वं मा भवेति त्रिशूलधृक् ।

प्राणेनेदं देहगेहं परिस्फुरति यन्त्रवत् ।। ७

प्राणहीनं परिस्पन्दं त्यक्त्वा तिष्ठति मूकवत् ।

चालनी पावनी शक्तिः शक्तिः संवेदनी चितिः ।। ८

सा मूर्ता खादपि स्वच्छा सत्सत्तैवात्र कारणम् ।

विनश्यतः प्राणदेहौ वियोगान्मरुदेव च ।। ९

चिदात्मा खादपि स्वच्छो न विनश्यति किं भ्रमैः ।
मनःप्राणमये देहे चित्तत्त्वं परिजायते ।। १०
मुकुरे ह्यमलाभासे प्रतिबिम्बं प्रवर्तते ।
सदप्यग्रगतं वस्तु प्रतिबिम्बक्रिया विना ।। ११
यथा नास्ति मलोपेते मुकुरे मुनिनायक ।
तथा नास्ति गतप्राणे विद्यमानेऽपि देहके ।। १२
सर्वगापि चिदुच्छूनबोधात्स्पन्दादिकं प्रति ।
बोधात्कलङ्कविमला चिदेव परमं शिवम् ।। १३
विदुर्देवं तदाभासं सर्वसत्तार्थदं तथा ।
स हरिः स शिवः सोऽजः स ब्रह्मा स सुरेश्वरः ।। १४
अनिलानलचन्द्रार्कवपुः स परमेश्वरः ।
स एष सर्वगो ह्यात्मा चित्खनिश्चेतनः स्मृतः ।। १५
देवेशो देवभृद्धाता देवदेवो दिवः पतिः ।
महाचितः समुल्लासं मुह्यन्तीव न केचन ।। १६
ये नाम ते जगत्येते ब्रह्मविष्णुहरादयः ।
परस्मात्परिनिर्याता ब्रह्मविष्णुहरादयः ।। १७
कणास्तप्तायस इव वारिधेरिव बिन्दवः ।
तेष्विव भ्रमभूतेषु जातेष्विव परात्पदात् ।। १८
स्थितेषु भ्रमबीजेषु कल्पनाजालकर्तृषु ।
सहस्रशतशाखेयमविद्योदेति पीवरी ।। १९
वेदवेदार्थवेदादिजीवजालजटावली ।
ततस्तस्या अनन्तायाः प्रसृतायाः पुनःपुनः ।। २०
संपन्नदेशकालायाः क्रमः स्याद्वर्णनासु कः ।
ब्रह्मविष्णुहरादीनामतोऽयं परमः पिता ।। २१
मूलबीजं महादेवः पल्लवानामिव द्रुमः ।
सर्वसत्त्वाभिधः सर्वः सर्वसंवेदनैककृत् ।। २२

सर्वसत्ताप्रदो भास्वान्वन्द्योऽभ्यर्च्यश्च तद्विदः ।

प्रत्यक्षवस्तुविषयः सर्वत्रैव सदोदितः ।। २३

संवेदनात्मकतया गतया सर्वगोचरम् ।

न तस्याह्वानमन्त्रादि किंचिदेवोपयुज्यते ।। २४

नित्याहूतः स सर्वस्थो लभ्यते सर्वतः स्वचित् ।

यां यां वस्तुदशां याति तत एव मुने शिवम् ।। २५

स्वरूपं समवाप्नोति रूपालोकमनोदृशाम् ।

आद्यं पूज्यं नमस्कार्यं स्तुत्यमर्घ्यं सुरेश्वरम् ।। २६

एनं तं विद्धि वेद्यानां सीमान्तं महतामपि ।

एतमात्मानमालोक्य जराशोकभयापहम् ।

संभृष्टबीजवज्जन्तुर्न भूयः परिरोहति ।। २७

सकलजन्तुषु यत्त्वभयप्रदं

विदितमाद्यमुपास्यमयत्नतः ।

त्वमजमात्मगतं परमं पदं

भवसि किं परिमुह्यसि दृष्टिषु ।। २८

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मो० निर्वाणप्रकरणे पू० महादेवस्य पूज्यसीमान्तत्वकथनं नाम पञ्चत्रिंशः सर्गः ।। ३५।।